# CBSE Test Paper 02
## Ch-10 प्राणेभ्योऽपि प्रियः सुहृत्

1. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

   चाणक्यः - वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

   शिष्यः - तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्! (उभौ परिक्रामतः)

   शिष्यः - (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः।

   चन्दनदासः - जयत्वार्यः

   चाणक्यः - श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः?

   चन्दनदासः - (आत्मगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता मे वाणिज्य।

   चाणक्यः - भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

   चन्दनदासः - आज्ञापयतु आर्यः, किं कियत् च अस्मन्जनादिष्यते इति।

   I. **एकपदेन उत्तरत-**
      i. चाणक्य कम् द्रष्टुमिच्छति?
      ii. शिष्यः केन सह प्रविशति?

   II. **पूर्णवाक्येन उत्तरत-**
      i. राजानः किमच्छन्ति?

   III. **भाषिककार्यम्-**
      i. 'आत्मगतम्' इति पदस्य विपर्ययपदं किं आगतम्?
         (क) उपसृत्य
         (ख) प्रकाशम्
         (ग) उभौ
         (घ) परिक्रामतः
      ii. 'आचार्य' इत्यर्थे किं पदं प्रयुक्तम्?
         (क) उपाध्याय
         (ख) श्रेष्ठी
         (ग) शिष्यः
         (घ) चाणक्य
      iii. 'परिक्रामतः' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?
         (क) अत्यादरः
         (ख) प्रकाशम्
         (ग) उभौ

(घ) स्वागतम्

2. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

   i. शिविना विनाइदं **दुष्करं** कार्य कः कुर्यात्।
   ii. एष एव **ते** निश्चयः।
   iii. त्वम् **मे** भयं दर्शयसि।
   iv. **अमात्यराक्षसस्य** गृहजनं न समर्पयामि।

3. **अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

   सुलभेष्वर्थलाभेषु परसंवेदने जने।
   क इदं दुष्करं कुर्यादिदानीं शिविना विना।।
   **भावार्थः-** परकीयस्य वस्तुनः (i)________ कृते सति अर्थलाभे सुलभे सत्यपि स्वार्थं (ii)_________ परेषां संरक्षणरूपं दुष्करं कर्म अस्मिन् (iii)__________ महाराजं (iv)_________ बिना कः करिष्यति?

| |
|---|
| **मञ्जूषा-** संसारे, परित्यज्य, शिविं, समर्पणे |

4. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत-**

   i. चाणक्य कथयति चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्।
   ii. अमात्य राक्षसस्य गृहजनं स्वगृहे रक्षसि।
   iii. भीताः राजपुरुषाः पौराणाम् इच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति।
   iv. कः पुनः अधन्यः राज्ञः विरुद्धः आर्येण अवगम्यते।
   v. कीदृशः तृणानाम् अग्निना सह विरोधः भवतु।
   vi. राजनि अविरुद्धवृत्तिर्भव।
   vii. सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि।
   viii. अलीकमेतत्। अनार्येण आर्याय निवेदितवान्।

## CBSE Test Paper 02

## Ch-10 प्राणेभ्योऽपि प्रियः सुहृत्

## Answer

1. I. (i) चन्दनदासम्

   (ii) चन्दनदासेन

   II. (i) प्रीताभ्यः प्रकृतिभ्यः प्रति प्रियमिच्छन्ति राजानः।

   III. (i) (ख) प्रकाशम्

   (ii) (क) उपाध्याय

   (iii) (ग) उभौ

2. i. कीदृशम्, ii. कस्य, iii. कस्मै, iv. कस्य

3. i. समर्पणे, ii. परित्यज्य, iii. संसारे, iv. शिविं

4. i. चाणक्य कथयति चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्।
   ii. राजनि अविरुद्धवृत्तिर्भव।
   iii. कः पुनः अधन्यः राज्ञः विरुद्धः आर्येण अवगम्यते।
   iv. कीदृशः तृणानाम् अग्निना सह विरोधः भवतु।
   v. अमात्य राक्षसस्य गृहजनं स्वगृहे रक्षसि।
   vi. अलीकमेतत्। अनार्येण अर्याय निवेदितवान्।
   vii. भीताः राजपुरुषाः पौराणाम् इच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति।
   viii. सन्तमपि गेहे अमात्यराक्षस्य गृहजनं न समर्पयामि।